# किं किम् उपादेयम्

1\. *भगवन्किमुपादेयम्? गुरुवचनम्, हेयमपि च किम्? अकार्यम्।*
*को गुरुः? अधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥1॥*

**हिंदी अनुवाद (Hindi Translation)**

भगवन! ग्रहण करने योग्य क्या है? गुरु के वचन। त्यागने योग्य क्या है? बुरा कार्य। गुरु कौन है? तत्त्वों को जानने वाला तथा निरन्तर शिष्यहित में तैयार रहने वाला।

**अन्वयं कुरुत (Prose-order)**

**भगवन्किमुपादेयम्? गुरुवचनम्, हेयमपि च किम्? अकार्यम्।**
**को गुरुः? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्॥1॥**

भगवन्! (*i*) .................... किम्? गुरुवचनम्। अपि च (*ii*) .................... किम्? अकार्यम्। (*iii*) .................... कः? सततम् शिष्यहिताय (*iv*) .................... अधिगततत्त्वः।

**मञ्जूषा–** | हेयम्, उद्यतः, गुरुः, उपादेयम् |

**उत्तराणि–**(*i*) उपादेयम् (*ii*) हेयम् (*iii*) गुरुः (*iv*) उद्यतः।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**उपादेयम्–**ग्राह्यम्, ग्रहण करने योग्य (Acceptable)। **हेयम्–**त्याज्यम्, त्यागने योग्य (Disposable)। **सततम्–**निरन्तरम्, लगातार (Perpetual)। **अधिगततत्त्वः–**तत्त्वानां ज्ञातारः, तत्त्वों को जानने वाला (Learned)।

**संस्कृते भावार्थः (Summary)**

**भगवन्किमुपादेयम्? गुरुवचनम्, हेयमपि च किम्? अकार्यम्।**
**को गुरुः? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्॥1॥**

हे भगवन् अस्मिन् लोके (*i*) .................... किम् अस्ति? उत्तरम् अस्ति–गुरुणाम् वचनम्। एवमेव (*ii*) .................... किम्? उत्तरम् अस्ति–दुष्कार्यम्। गुरुः कः कथ्यते? यः (*iii*) .................... स्वशिष्याणाम् कल्याणाय (*iv*) .................... भवति, येन च यथार्थज्ञानम् प्राप्तम् भवति।

**मञ्जूषा–** | तत्परः, ग्राह्यम्, निरन्तरम्, त्याज्यम् |

**उत्तराणि–**(*i*) ग्राह्यम् (*ii*) त्याज्यम् (*iii*) निरन्तरम् (*iv*) तत्परः।

**समासाः (Compounds)**

शिष्यहिताय – शिष्याणाम् हिताय (षष्ठी तत्पुरुषः)।
गुरुवचनम् – गुरोः वचनम् (षष्ठी तत्पुरुषः)।
अकार्यम् – न कार्यम् (नञ् तत्पुरुषः)।
अधिगततत्त्वः – अधिगतम् तत्त्वं येन सः (बहुव्रीहिः)

**सन्धि-विच्छेदः (Disjoin Sandhi)**

हितायोद्यतः – हिताय + उद्यतः (गुणसन्धिः)।
को गुरुः – कः + गुरुः (उत्व विसर्ग)।

**प्रत्ययाः (Suffixes)**

भगवन् – भग + मतुप्।
हेयम् – हा + यत्।

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) हेयम् किम्? (*ii*) अत्र किम् सम्बोधनपदम्?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) उपादेयम् किम् भवति? (*ii*) गुरुः कः कथ्यते?

**(III) भाषिककार्यम्–**

(*i*) 'निरन्तरम्' इत्यस्य शब्दस्य अर्थे श्लोके किं पदं प्रयुक्तम्?

(क) सततम् (ख) अकार्यम् (ग) उद्यतः (घ) हेयम्

(*ii*) 'तत्परः' इति पदस्य अत्र पर्याय प्रयुक्तम्?

(क) अधिगततत्त्वः (ख) अधिगतः (ग) हेयम् (घ) उद्यतः

(*iii*) 'उपादेयम्' इति पदस्य विलोमपद अत्र किम्?

(क) सततम् (ख) हेयम् (ग) अकार्यम् (घ) तत्त्वः

(*iv*) 'शिष्यहितायोद्यतः' इति पदस्य सन्धिविच्छेदं कृत्वा लिखत।

(क) शिष्यहिता + ओद्यतः (ख) शिष्यहितायो + द्यतः

(ग) शिष्यहिताय + उद्यतः (घ) शिष्यहिताय + ओद्यतः

**उत्तराणि–** (I) (*i*) अकार्यम् (*ii*) भगवन्।

(II) (*i*) उपादेयम् गुरुवचनं भवति। (*ii*) सः गुरुः अस्ति यः अधिगततत्वः शिष्यहिताय च सततम् उद्यतः अस्ति।

(III) (*i*) (क) सततम् (*ii*) (घ) उद्यतः (*iii*) (ख) हेयम् (*iv*) (ग) शिष्यहिताय + उद्यतः।

**प्रश्ननिर्माणम्–** (*i*) **गुरुवचनम्** उपादेयं भवति। (*ii*) अकार्यं **हेयम्** अस्ति।

(*iii*) गुरुः **शिष्याणां** हिताय तत्परः भवति। (*iv*) यः तत्त्वान् जानाति सः **गुरुः** अस्ति।

**उत्तराणि–**(*i*) किम् (*ii*) कीदृशम् (*iii*) केषाम् (*iv*) कः।

***2. कः पथ्यतरः? धर्मः, कः शुचिरिह? यस्य मानसं शुद्धम्।***
***कः पण्डितः? विवेकी, किं विषम्? अवधीरणा गुरुषु॥2॥***

## हिंदी अनुवाद (Hindi Translation)

अधिक कल्याणकारी क्या है? धर्म। इस संसार में पवित्र कौन है? जिसका मन शुद्ध है। पण्डित कौन है? विवेकवान्। विष क्या है? गुरुओं की अवहेलना।

## अन्वयं लिखत (Prose-order)

**कः पथ्यतरः? धर्मः, कः शुचिरिह? यस्य मानसं शुद्धम्।**
**कः पण्डितः? विवेकी, किं विषम्? अवधीरणा गुरुषु॥2॥**

पथ्यतर कः? (*i*) ..................... इह शुचिः कः? यस्य (*ii*) ..................... शुद्धम्। पण्डितः कः? (*iii*) ..................... विषम् किम्? (*iv*) ..................... अवधीरणा।

**मञ्जूषा–** | मानसं, गुरुषु, धर्मः, विवेकी |

**उत्तराणि–**(*i*) धर्मः (*ii*) मानसं (*iii*) विवेकी (*iv*) गुरुषु।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**इह**–अस्मिन् संसारे, इस संसार में (In this world)। **शुचिः**–पवित्रः, पवित्र (Pious)। **अवधीरणा**–तिरस्कारः, अपमान (Insult)। **पथ्यतरः**–कल्याणकरः, कल्याणकारी (Wealthful)। **पण्डितः**–विद्वान्, विद्यावाला (Intelligent)।

## संस्कृते भावार्थः (Summary)

**कः पथ्यतरः? धर्मः, कः शुचिरिह? यस्य मानसं शुद्धम्।**
**कः पण्डितः? विवेकी, किं विषम्? अवधीरणा गुरुषु॥2॥**

अस्मिन् संसारे (*i*) ………………… एव पथ्यतरः अस्ति। यस्य मनः पवित्रं निर्मलं (*ii*) ………………… चास्ति सः एव पवित्रः भवति। यः सर्वाणि कार्याणि विचार्य करोति सः पण्डितः (*iii*) ………………… भवति। गुरुणाम् तिरस्कारम् (*iv*) ………………… इव जनान् नाशयति।

**मञ्जूषा–** विवेकी, विषम्, धर्मः, शुद्धम्

**उत्तराणि–**(*i*) धर्मः (*ii*) शुद्धम् (*iii*) विवेकी (*iv*) विषम्।

## सन्धि-विच्छेदः (Disjoin Sandhi)

शुचिरिह – शुचिः + इह (विसर्गसन्धिः)।

## प्रत्ययाः (Suffixes)

विवेकी – विवेक + इन्। पथ्यतरः – पथ्य + तरप्।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) पण्डितः कः? (*ii*) गुरुषु अवधीरणा किम्?

**(II) पूर्णवाक्येन उत्तरत–**

शुचिः कः भवति?

**(III) भाषिककार्यम्–**

(*i*) 'शुचिरिह' अत्र सन्धि-विच्छेदं कुरुत।
(क) शुचिर् + इह (ख) शुचिः + इह (ग) शुचि + रिह (घ) शुचिरि + ह

(*ii*) 'शुद्धम् मानसम्' इति अनयोः पदयोः विशेष्यपदं किम्?
(क) मानसम् (ख) मानस (ग) शुद्ध (घ) शुद्धम्

(*iii*) 'विवेकी' इति पदे कः प्रत्ययः?
(क) इन् (ख) ईङ् (ग) ईन् (घ) इञ्

(*iv*) अस्मिन् श्लोके अव्ययपदम् किम्?
(क) धर्मः (ख) किम् (ग) शुचिरिह (घ) इह

**उत्तराणि–** (I) (*i*) विवेकी। (*ii*) विषम्।
(II) (*i*) यस्य मानसं शुद्धं सः शुचिः भवति।
(III) (*i*) (ख) शुचिः + इह (*ii*) (क) मानसम् (*iii*) (क) इन् (*iv*) (घ) इह

**प्रश्ननिर्माणम्–** (*i*) **धर्मः** पथ्यतरः भवति। (*ii*) **शुचेः** मानसं शुद्धं भवति।
(*iii*) विवेकी **पण्डितः** भवति। (*iv*) गुरुषु अपमानं **विषम्** वर्तते।
(*v*) **गुरुणाम्** अवधीरणा विषमिव घातकः वर्तते।

**उत्तराणि–**(*i*) कः (*ii*) कस्य (*iii*) कः (*iv*) किम् (*v*) केषाम्।

***3. किं जीवितम्? अनवद्यम्, किं जाड्यम्? पाठतोऽप्यनभ्यासः।***
***को जागर्ति? विवेकी, का निद्रा? मूढता जन्तोः॥3॥***

## हिंदी अनुवाद (Hindi Translation)

जीवन क्या है? कलंकरहित। मूर्खता क्या है? पढ़ते हुए भी अभ्यास न करना। जागता कौन है? विवेकवान्। निद्रा क्या है? प्राणी की मूर्खता।

### अन्वयं लिखत (Prose-order)

**किं जीवितम्? अनवद्यम्, किं जाड्यम्? पाठतोऽप्यनभ्यासः।**
**को जागर्ति? विवेकी, का निद्रा? मूढता जन्तोः॥3॥**

जीवितम् किम्? (*i*) .................... जाड्यम् किम्? (*ii*) .................... अपि अनभ्यासः। कः (*iii*) .................... विवेकी। निद्रा का? (*iv*) .................... मूढता।

**मञ्जूषा–** | जागर्ति, जन्तोः, पाठतः, अनवद्यम् |

**उत्तराणि–**(*i*) अनवद्यम् (*ii*) पाठतः (*iii*) जागर्ति (*iv*) जन्तोः।

### शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**अनवद्यम्–**अनिन्दनीयम्, अनिन्दनीय (That can not be condemned)। **जाड्यम्–**मूर्खता (Foolishness)।

### संस्कृते भावार्थः (Summary)

**किं जीवितम्? अनवद्यम्, किं जाड्यम्? पाठतोऽप्यनभ्यासः।**
**को जागर्ति? विवेकी, का निद्रा? मूढता जन्तोः॥3॥**

अर्थात्–अनिन्द्यं (*i*) .................... च जीवनम् एव वस्तुतः जीवनं कथयितुम् शक्यते। पठितं परं तस्य अभ्यासः न कृतः तदेव (*ii*) .................... कथ्यते यतो हि अनभ्यासे विद्या विषं भवति। सः एव नरः (*iii*) .................... भवति यः जीवने सदैव जागरुकः भवति। यः अवसरे प्राप्ते सावधानः भूत्वा तस्य सदुपयोगं न करोति, तस्य नरस्य ईदृशी मूर्खता एव अत्र (*iv*) .................... कथिता।

**मञ्जूषा–** | मूढता, जाड्यं, निष्कलङ्कम्, विवेकी |

**उत्तराणि–**(*i*) निष्कलङ्कम् (*ii*) जाड्यं (*iii*) विवेकी (*iv*) मूढता।

### समासाः (Compounds)

अनवद्यम् – न अवद्यम् (नञ् तत्पुरुषः)।     अनभ्यासः – न अभ्यासः (नञ् तत्पुरुषः)।

### प्रत्ययाः (Suffixes)

विवेकी – विवेक + इन्।     मूढता – मूढ + तल्।

### सन्धि-विच्छेदः (Disjoin Sandhi)

पाठतोऽप्यनभ्यासः – पाठतो + अपि + अनभ्यासः (पूर्वरूप, यण्सन्धिः)।

### प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) जीवितम् किम्?     (*ii*) अत्र कति प्रश्नाः सन्ति?

**(II) पूर्णवाक्येन उत्तरत–**

जाड्यम् किम् भवति?

**(III) भाषिककार्यम्–**

(*i*) 'विवेकी' पदे कः प्रत्ययः?
(क) ईन्     (ख) इन्     (ग) ङीप्     (घ) ईञ्

(*ii*) 'न अवद्यम्' इति स्थाने किं पदं प्रयुक्तम्?
(क) अनवद्यम्     (ख) अवद्यम्     (ग) अनावद्यम्     (घ) अनवाद्यम्

(*iii*) 'मूर्खता' इति पदस्य पर्यायपदं किम्?
(क) अनभ्यासः     (ख) अनवद्यम्     (ग) निद्रा     (घ) मूढता

(*iv*) 'जन्तोः' इति पदे का विभक्तिः?
(क) तृतीया     (ख) सप्तमी     (ग) षष्ठी     (घ) द्वितीया

(*v*) 'शेते' इति पदस्य विपर्ययपदं किम्?
(क) निद्रा     (ख) जागर्ति     (ग) जन्तोः     (घ) जीवितम्

**उत्तराणि–** (I) (*i*) अनवद्यम् (*ii*) चत्वारः।

(II) पाठतोऽप्यनभ्यासः जाड्यम् भवति।

(III) (*i*) (ख) इन् (*ii*) (क) अनवद्यम् (*iii*) (घ) मूढता (*iv*) (ग) षष्ठी (*v*) (ख) जागर्ति।

**प्रश्ननिर्माणम्–** (*i*) **जन्तोः** मूढता निद्रा भवति। (*ii*) पठनस्य अनभ्यासः एव **जाड्यम्** अस्ति।

(*iii*) **विवेकी** एव सदैव जागर्ति। (*iv*) **अनिन्दितः** एव सदा जीवति।

(*v*) सदैव पठितस्य **अभ्यासः** कर्तव्यः।

**उत्तराणि–**(*i*) कस्य (*ii*) किम् (*iii*) कः (*iv*) कः/कीदृशः (*v*) कः।

***4. नलिनीदलगतजलवत्तरलं किम्? यौवनं धनं चायुः।***
***कथय पुनः के शशिनः किरणसमाः? सज्जना एव॥4॥***

## हिंदी अनुवाद (Hindi Translation)

कमलिनी के पत्ते पर पड़े हुए जल के समान चंचल क्या है? यौवन, धन और आयु। फिर बताओ चन्द्रमा की किरणों के समान (शीतल) कौन है? सज्जन ही।

## अन्वयं लिखत (Prose-order)

**नलिनीदलगतजलवत्तरलं किम्? यौवनं धनं चायुः।**
**कथय पुनः के शशिनः किरणसमाः? सज्जना एव॥4॥**

नलिनीदलगत (*i*) ..................... तरलम् किम्? यौवनम्, (*ii*) ..................... आयुः च? पुनः कथय, (*iii*) ..................... किरणसमाः के? (*iv*) ..................... एव।

**मञ्जूषा–** | धनम्, सज्जनाः, जलवत्, शशिनः |

**उत्तराणि–**(*i*) जलवत् (*ii*) धनम् (*iii*) शशिनः (*iv*) सज्जनाः।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**नलिनीदलगतजलवत्**–नलिन्याः दले गतं जलवत्, कमलिनी के पत्ते पर पड़े जलबिन्दु के समान (Like the drops of water resting on the leaves of a lotus plant)। शशिनः चन्द्रस्य, चन्द्रमा के (of Moon)

## संस्कृते भावार्थः (Summary)

**नलिनीदलगतजलवत्तरलं किम्? यौवनं धनं चायुः।**
**कथय पुनः के शशिनः किरणसमाः? सज्जना एव॥4॥**

अस्य भावः अस्ति यत्–अस्मिन् संसारे यौवनम् धनम् आयुः च कमलिन्याः पत्रे पतितं जलम् इव (*i*) ..................... भवन्ति। अर्थात् यथा कमलपत्रपतितम् जलकणानि क्षणभङ्गुराणि अस्थिराणि च भवन्ति तथैव मनुष्यस्य युवावस्था तेन अर्जितं धनम् तस्य आयुः चापि अस्थिराणि भवन्ति। एतद्विपरीतम् (*ii*) ..................... किरणसमाः (शीतलाः शान्ताः वा) के भवन्ति? अस्य उत्तरम् अस्ति–नूनमेव सज्जनाः। अर्थात् यथा चन्द्रस्य (*iii*) ..................... मनुष्येभ्यः शीतलताम् प्रयच्छन्ति तथैव (*iv*) ..................... सम्पर्के अपि मनुष्यः शीतलताम् आप्नोति।

**मञ्जूषा–** | शशिनः, सज्जनानाम्, चञ्चलानि, किरणाः |

**उत्तराणि–**(*i*) चञ्चलानि (*ii*) शशिनः (*iii*) किरणाः (*iv*) सज्जनानाम्

## समासाः (Compounds)

किरणसमाः – किरणैः समाः (तृतीया तत्पुरुषः)। सज्जनाः – सतः च ते जनाः (कर्मधारयः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

चायुः – च + आयुः (दीर्घसन्धिः)। सज्जनाः – सत् + जनाः (श्चुत्व, जशत्व सन्धिः)।

## प्रत्ययाः (Suffixes)

गत – गम् + क्त। शशिनः – शश + इन्।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) सज्जनाः कीदृशाः भवन्ति? (*ii*) के शशिनः किरण समाः?

**(II) पूर्णवाक्येन उत्तरत–**

नलिनीदलगतजलवत्तरलं किम्?

**(III) भाषिककार्यम्–**

(*i*) 'कथय' पदे कः लकारः?

(क) लङ् लकारः (ख) लोट् लकारः (ग) लृट लकारः (घ) विधिलिङ्ग लकारः

(*ii*) 'आयुः' इति पदम् कस्मिन् लिङ्गे अस्ति?

(क) पुल्लिङ्गे (ख) स्त्रीलिङ्गे (ग) नपुंसकलिङ्गे (घ) किञ्चिदपि न

(*iii*) 'शशिनः' पदे का विभक्तिः?

(क) तृतीया (ख) चतुर्थी (ग) सप्तमी (घ) षष्ठी

(*vi*) 'दलम्' इति पदस्य अर्थम् प्रसंगानुसारम् अस्ति—

(क) पत्रम् (ख) समूहः (ग) समूहो (घ) इतः

**उत्तराणि–** (I) (*i*) शशिकिरणसमाः।

(*ii*) सज्जनाः।

(II) नलिनीदलगतजलवत्तरलम् यौवनं धनम् आयुः च सन्ति।

(III) (*i*) (ख) लोट्लकारः (*ii*) (ग) नपुंसकलिङ्गे (*iii*) (घ) षष्ठी (*iv*) (क) पत्रम्।

**प्रश्ननिर्माणम्–** (*i*) सज्जनाः **शशिकिरणसमाः** भवन्ति। (*ii*) शशिनः किरणाः **शीतलाः** भवन्ति।

(*iii*) यौवनं **तरलं** भवति। (*iv*) **जलं** चञ्चल भवति।

(*v*) नलिनीदलम् **कमलिन्याः** पत्रं कथ्यते।

**उत्तराणि–**(*i*) कीदृशाः (*ii*) कीदृशाः (*iii*) कीदृशम् (*iv*) किम् (*v*) कस्याः।

***5. कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।***
***सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी॥5॥***

## हिंदी अनुवाद (Hindi Translation)

अनर्थकारी फल देने वाला कौन है? अभिमान। सुखदायी कौन है? सज्जनों की मित्रता। सभी बुराइयों का नाश करने में समर्थ कौन है? सब प्रकार से त्याग करने वाला।

## अन्वयं लिखत (Prose-order)

**कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।**
**सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी॥5॥**

अनर्थफलः कः? (*i*) .................... सुखदा का? साधुजन (*ii*) .................... सर्वव्यसनविनाशे कः (*iii*) .................... सर्वथा (*iv*) ....................।

**मञ्जूषा–** मैत्री, दक्षः, त्यागी, मानः

**उत्तराणि–**(*i*) मानः (*ii*) मैत्री (*iii*) दक्षः (*iv*) त्यागी।

## शब्दार्थाः (Word–meanings Sanskrit to Sanskrit, Hindi and English)

**अनर्थफलः**–अनिष्टः, अनर्थ (One which leads to evil results)। **दक्षः**–निपुणः, निपुण (Expert)। **मैत्री**–मित्रता, मित्रता (Friendship), **साधुजन**–सज्जनः, श्रेष्ठ लोग (Intelactual person)।

## संस्कृते भावार्थः (Summary)

**कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।**
**सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी॥5॥**

अस्य भावः अयम् अस्ति यत्–अभिमानः परिणामे (*i*) .................... भवति। अतः (*ii*) .................... अत्र अनर्थफलः कथितः। साधुजनानां मैत्री सदैव (*iii*) .................... भवति। यः मानवः सर्वथा (*iv*) .................... भवति स एव सर्वासां विपदां विनाशं कर्तुं समर्थः भवति।

**मञ्जूषा–** त्यागी, अनर्थकरः, सुखदायिनी, मानः

**उत्तराणि–**(*i*) अनर्थकरः (*ii*) मानः (*iii*) सुखदायिनी (*iv*) त्यागी।

## समासाः (Compounds)

अनर्थः – न अर्थः (नञ् तत्पुरुषः)। सुखदा – सुखम् ददाति इति (उपपद तत्पुरुषः)।

साधुजनः – साधुः च असौ जनः (कर्मधारयः)। साधुजनमैत्री – साधुजनानाम् मैत्री (षष्ठी तत्पुरुषः)।

अनर्थफलः – अनर्थस्य फलः (षष्ठी तत्पुरुषः)। सर्वव्यवसनविनाशे –सर्वेषाम् व्यसनानाम् विनाशे (कर्मधारयः, षष्ठी तत्पुरुषः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

कोऽनर्थफलः – को + अनर्थफलः (पूर्वरूपसन्धिः)।

को दक्षः – कः + दक्षः (विसर्गसन्धिः)।

## प्रत्ययाः (Suffixes)

त्यागी – त्याग + इन्। मैत्री – मित्र + ङीप्। सुखदा – सुखद + टाप्।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) कोऽनर्थफलः? (*ii*) अत्र कति प्रश्नाः सन्ति?

**(II) पूर्णवाक्येन उत्तरत–**

सुखदा का?

**(III) भाषिककार्यम्–**

(*i*) 'त्यागी' पदे क: प्रत्यय:?

(क) इन्　(ख) ईन्　(ग) ङीप्　(घ) ईञ्

(*ii*) 'सुखं ददाति इति या सा' इति स्थाने किं पदं प्रयुक्तम्?

(क) सुखा　(ख) सुखी　(ग) सुखदा　(घ) सुखदं

(*iii*) 'त्यागी' इति पदे क: मूलशब्द:?

(क) त्याग:　(ख) त्याग　(ग) त्यागिन्　(घ) त्यागी

(*iv*) अस्मिन् श्लोके अव्ययपदं किम्?

(क) त्यागी　(ख) का　(ग) मैत्री　(घ) सर्वथा

**उत्तराणि–** (I) (*i*) मान:　(*ii*) त्रय:।

(II) सुखदा साधुजन मैत्री भवति।

(III) (*i*) (क) इन्　(*ii*) (ग) सुखदा　(*iii*) (ख) त्याग　(*iv*) (घ) सर्वथा।

**प्रश्ननिर्माणम्–** (*i*) साधुजनमैत्री **सुखदा** भवति।　(*ii*) **मान:** एव अनर्थफल: अस्ति।

(*iii*) **दक्षस्य** अर्थ: कुशलोऽस्ति।　(*iv*) **त्यागी** एव सर्वव्यसनविनाशं करोति।

(*v*) अहंकारी जन: **अहंकारं** प्राप्नोति।

**उत्तराणि–**(*i*) कीदृशी　(*ii*) क:　(*iii*) कस्य　(*iv*) क:　(*v*) कम्।

***6. किं मरणम्? मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।***
***आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम् ॥6॥***

## हिंदी अनुवाद (Hindi Translation)

मृत्यु क्या है? मूर्खता। बहुमूल्य क्या है? जो उचित समय पर दे दिया जाए। मृत्यु तक काँटे की तरह चुभने वाला क्या है? जो पाप छिपकर किया गया हो।

## अन्वयं लिखत (Prose-order)

**किं मरणम्? मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।**
**आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम् ॥6॥**

मरणम् किम्? (*i*) .................... अनर्घम् च किम्? यत् (*ii*) .................... दत्तम्। आमरणात् (*iii*) .................... किम्? यत् पापं (*iv*) .................... कृतम्।

**मञ्जूषा–** | शल्यम्, अवसरे, मूर्खत्वम्, प्रच्छन्नं |

**उत्तराणि–**(*i*) मूर्खत्वम्　(*ii*) अवसरे　(*iii*) शल्यम्　(*iv*) प्रच्छन्नं।

## शब्दार्था: (Word–meanings Sanskrit to Sanskrit, Hindi and English)

**अनर्घम्**–बहुमूल्यम्, बहुमूल्य (Precious)। **शल्यम्**–कण्टकम्, काँटा (Thorn)। **मरणम्**–मृत्यु:, मृत्यु (Death), **अवसरे**–उचित समये, उचित समय पर (In time)। **आमरणात्**–मृत्युं यावत्, मृत्यु तक (Till death)।

## संस्कृते भावार्थ: (Summary)

**किं मरणम्? मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।**
**आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम् ॥6॥**

अस्य भावोऽस्ति यत्–अस्मिन् जीवने (*i*) .................... एव मरणं कथ्यते। यस्य जन्म भवति तस्य मरणम् अपि निश्चितं भवति। एतत् तु प्राकृतिकं विधानम् अस्ति। परन्तु ये जना: मूर्खतावशात् पदे-पदे (*ii*) .................... भवन्ति ते तु जीविता: भूत्वा अपि मृता: एव। एवमेव यत् यथासमयं दीयते तत् अमूल्यम् बहुमूल्यं वा भवति। (*iii*) .................... गुप्तरूपेण क्रियते तत् मरणम् यावत् (*iv*) .................... इव कष्टं ददाति।

**मञ्जूषा–** | अपमानिता:, शल्यम्, मूर्खत्वं, यत्पापं |

**उत्तराणि–**(*i*) मूर्खत्वं　(*ii*) अपमानिता:　(*iii*) यत्पापं　(*iv*) शल्यम्।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

किं मरणम् – किम् + मरणम् (अनुस्वार सन्धिः) यदवसरे – यत् + अवसरे (व्यंजन सन्धिः)।
चानर्घम् – च + अनर्घम् (दीर्घ सन्धिः)। प्रच्छन्नं – प्र + छन्नं (तुगागम सन्धिः)।

**प्रत्ययाः (Suffixes)**

मूर्खत्वम् – मूर्ख + त्व। मरणम् – मृ + ल्युट्।

**समासः (Compounds)**

अनर्घम् – न अर्घम् (नञ् तत्पुरुषः)।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) मरणम् किं भवति? (*ii*) 'शल्यम्' इत्यस्य शब्दस्य कः अर्थः?

**(II) पूर्णवाक्येन उत्तरत–**

अनर्घम् किम्?

**(III) भाषिककार्यम्–**

(*i*) 'प्रच्छन्नम्' इति कस्य पदस्य विशेषणम्?
(क) पापस्य (ख) कृतस्य (ग) मरणस्य (घ) शल्यस्य

(*ii*) 'मूर्खत्वम्' पदे कः प्रत्ययः?
(क) त्व (ख) मतुप् (ग) इन् (घ) त्वम्

(*iii*) 'दत्तम्' इति पदे कः प्रत्ययः वर्तते?
(क) तम् (ख) क्त्वा (ग) क्तवतु (घ) क्त

(*iv*) 'न अर्घम्' इति स्थाने किं पदं प्रयुक्तम्?
(क) अनर्घम् (ख) अर्घम् (ग) अर्घाम् (घ) नार्घम्

**उत्तराणि–** (I) (*i*) मूर्खत्वम् (*ii*) कण्टकम्।
(II) अनर्घम् अवसरे दत्तम् भवति।
(III) (*i*) (क) पापस्य (*ii*) (क) त्व (*iii*) (घ) क्त (*iv*) (क) अनर्घम्।

**प्रश्ननिर्माणम्–** (*i*) **मूर्खत्वम्** एव मरणं भवति। (*ii*) अनर्घम् **अवसरे** दत्तं वर्तते।
(*iii*) प्रच्छन्नं **कृतं** पापं पीडयति। (*iv*) **पापं** मृत्युं यावत् कष्टं ददाति।

**उत्तराणि–**(*i*) किम् (*ii*) कदा (*iii*) कथम् (*iv*) किम्।

***7. कस्य वशे प्राणिगणः? सत्यप्रियभाषिणो विनीतस्य।
क्व स्थातव्यम्? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥7॥***

**हिंदी अनुवाद (Hindi Translation)**

प्राणिगण किसके वश में हैं? सत्य-प्रिय बोलने वाले विनम्र के। कहाँ ठहरना चाहिए? इहलोक और परलोक के लाभों से भरपूर न्याय के उचित मार्ग पर।

**अन्वयं लिखत (Prose-order)**

**कस्य वशे प्राणिगणः? सत्यप्रियभाषिणो विनीतस्य।
क्व स्थातव्यम्? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥7॥**

कस्य वशे (*i*) .................... सत्यप्रियभाषिणः (*ii*) ....................। क्व (*iii*) .................... दृष्टादृष्टलाभाढ्ये (*iv*) .................... पथि।

**मञ्जूषा–** स्थातव्यम्, प्राणिगणः, न्याय्ये, विनीतस्य

**उत्तराणि–**(*i*) प्राणिगणः (*ii*) विनीतस्य (*iii*) स्थातव्यम् (*iv*) न्याय्ये।

**शब्दार्थाः (Word–meanings Sanskrit to Sanskrit, Hindi and English)**

**दृष्टादृष्टलाभाढ्ये–**इह लोकस्य पर लोकस्य च लाभप्राचुर्ये, इस लोक और परलोक के लाभों से भरपूर (Rich in destined benefits)। **पथि–**मार्गे, रास्ते पर (On the way)।

**संस्कृते भावार्थः (Summary)**

**कस्य वशे प्राणिगणः? सत्यप्रियभाषिणो विनीतस्य।
क्व स्थातव्यम्? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥7॥**

अर्थात्–अस्मिन् लोकः यः जनः सत्यवादी प्रियभाषी (*i*) .............. च भवति तस्य वशे सर्वे प्राणिनः भवन्ति। अस्माभिः कस्य पक्षे स्थातव्यम्? इति प्रश्नस्य उत्तरम् अस्ति–दृष्ट अदृष्टलाभेन आढ्ये (*ii*) .............. पथि। अर्थात् अस्माभिः सदैव इह लोकस्य (*iii*) ............ च लाभप्राचुर्ये न्यायस्य सत्यस्य मार्गे एव स्थातव्यम् न तु (*iv*) ............ च पथि।

**मञ्जूषा–** असत्यस्य, न्यायस्य, विनीतः, परलोकस्य

**उत्तराणि–**(*i*) विनीतः (*ii*) न्यायस्य (*iii*) परलोकस्य (*iv*) असत्यस्य।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

दृष्टादृष्टः – दृष्ट + अदृष्टः (दीर्घ सन्धिः)। लाभाढ्ये – लाभ + आढ्ये (दीर्घ सन्धिः)।

सत्यप्रियभाषिणो विनीतस्य – सत्यप्रियभाषिणः + विनीतस्य (विसर्ग सन्धिः)।

**प्रत्ययाः (Suffixes)**

प्राणी – प्राण + इन्। स्थातव्यम् – स्था + तव्यत्। भाषिणः – भाष + इन्।

**समासाः (Compounds)**

प्राणिगणः – प्राणिनाम् गणः (षष्ठी तत्पुरुषः)।

न्याय्ये पथि – न्याय्यपथि (कर्मधारयः)।

सत्यप्रियभाषिणः – सत्यं च प्रियं च भाषते इति, तस्य (उपपद तत्पुरुषः)।

दृष्टादृष्ट – दृष्टः च अदृष्टः च (द्वन्द्वः)

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) श्लोके कति प्रश्नाः सन्ति? (*ii*) 'कुत्र' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

क्व स्थातव्यम्?

**(III) भाषिककार्यम्–**

(*i*) 'स्थातव्यम्' इति पदे कः प्रत्ययः?

(क) तव्य (ख) तव्यम् (ग) तव्यत् (घ) तव्यः

(*ii*) 'पथि' इति पदे का विभक्तिः?

(क) सप्तमी (ख) प्रथमा (ग) षष्ठी (घ) चतुर्थी

(*iii*) 'न्याये पथि' इति अनयोः पदयोः विशेषणपदं किम्?

(क) पथि (ख) न्याये (ग) न्यायः (घ) पथः

(*iv*) 'प्रियभाषिणः' इति पदे किं वचनम्?

(क) द्विवचनम् (ख) बहुवचनम् (ग) एकवचनम्

**उत्तराणि–** (I) (*i*) द्वौ (*ii*) क्व।

(II) दृष्टादृष्टलाभाढ्ये न्याय्ये पथि स्थातव्यम्।

(III) (*i*) (ग) तव्यत् (*ii*) (क) सप्तमी (*iii*) (ख) न्याये (*iv*) (ग) एकवचनम्।

**प्रश्ननिर्माणम्–** (*i*) **विनीतस्य** वशे प्राणिगणः भवति। (*ii*) सत्यप्रियभाषिणः जनाः **विश्वस्ताः** भवन्ति।

(*iii*) **न्याये** पथि एव स्थातव्यम्। (*iv*) **न्यायपथः** दृष्टादृष्टलाभाढ्यः वर्तते।

**उत्तराणि–**(*i*) कस्य (*ii*) कीदृशाः (*iii*) कीदृशे (*iv*) कः।

**8. *कोऽन्धः? योऽकार्यरतः, को बधिरः? यो हितानि न शृणोति।***
***को मूकः? यः काले प्रियाणि वक्तुं न जानाति॥8॥***

**हिंदी अनुवाद (Hindi Translation)**

अन्धा कौन है? जो बुरे कार्य में लगा हुआ है। बहरा कौन है? जो हितकारी बातें नहीं सुनता। गूँगा कौन है? जो समय पर प्रिय बातें कहना नहीं जानता।

**अन्वयं लिखत (Prose-order)**

**कोऽन्धः? योऽकार्यरतः, को बधिरः? यो. हितानि न शृणोति।**
**को मूकः? यः काले प्रियाणि वक्तुं न जानाति ॥8॥**

अन्धः कः? यः (*i*) ..................। बधिरः कः? यः (*ii*) .................. न शृणोति। (*iii*) .................. कः? यः काले (*iv*) .................. वक्तुं न जानाति।

**मञ्जूषा–** | हितानि, मूकः, प्रियाणि, अकार्यरतः |

**उत्तराणि–**(*i*) अकार्यरतः (*ii*) हितानि (*iii*) मूकः (*iv*) प्रियाणि।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**अकार्यरतः–**कुकर्मरतः, बुरे कार्य में लगा हुआ (Involved in evil deeds)। **काले–**समये, समय पर (On time)।

**संस्कृते भावार्थः (Summary)**

**कोऽन्धः? योऽकार्यरतः, को बधिरः? यो हितानि न शृणोति।**
**को मूकः? यः काले प्रियाणि वक्तुं न जानाति ॥8॥**

**अस्य श्लोकस्य भावोऽस्ति–**अस्मिन् संसारे स एव (*i*) .................. यः उचितानुचितं जानन् अपि अकरणीयं कृत्यं करोति। सः च बधिरः कथ्यते यः (*ii*) .................. वचनं न आकर्णयति। एवमेव सः मूकः कथ्यते यः (*iii*) .................. सति अपि मधुरं प्रियं वा न वदति। यः जनः निन्दनीयेषु कार्येषु संलग्नः भवति सः नेत्रवान् भूत्वा अपि अन्धः मन्यते। यः च हितकारीणि वचनानि कदापि न शृणोति सः कर्णयुक्तः अपि (*iv*) .................. एव। एवमेव यः जनः अवसरे प्राप्ते अपि मधुरं न वदति सः तु मूकः एव गण्यते।

**मञ्जूषा–** | समयप्राप्ते, अन्धः, बधिरः, हितकारि |

**उत्तराणि–**(*i*) अन्धः (*ii*) हितकारि (*iii*) समयप्राप्ते (*iv*) बधिरः।

**समासाः (Compounds)**

अकार्यरतः – अकार्ये रतः (सप्तमी तत्पुरुषः)। अकार्य – न कार्य (नञ् तत्पुरुषः)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

कोऽन्धः – को + अन्धः (पूर्वरूप सन्धिः)। को बधिरः – कः + बधिरः (विसर्ग सन्धिः)।
कोऽकार्यरतः – यो + अकार्यरतः (पूर्वरूप सन्धिः)।

**प्रत्ययः (Suffix)**

वक्तुम् – वच् + तुमुन्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**
अन्धः कः?

**(II) पूर्णवाक्येन उत्तरत–**
(*i*) बधिरः कः भवति? (*ii*) मूकः कः?

**(III) भाषिककार्यम्–**

(*i*) 'जानाति' इति पदे का मूलधातुः?
(क) जा (ख) जन् (ग) जात् (घ) ज्ञा

(*ii*) 'जानाति' इति क्रियायाः कर्तृपदं किम्?
(क) यः (ख) काले (ग) प्रियाणि (घ) वक्तुं

(*iii*) 'कोऽन्धः' इति पदस्य सन्धिविच्छेदं कृत्वा लिखत।
(क) को + अन्धः (ख) कः + अन्धः (ग) के + अन्धः (घ) को + आन्धः

(*iv*) 'यः' इति पदे मूलशब्दः कः?
(क) य (ख) यत् (ग) यः (घ) यो

**उत्तराणि–** (I) अकार्यरतः।
(II) (*i*) यो हितानि न शृणोति सः बधिरः भवति। (*ii*) यः काले प्रियाणि वक्तुं न जानाति सः मूकः भवति।
(III) (*i*) (घ) ज्ञा (*ii*) (क) यः (*iii*) (क) को + अन्धः (*iv*) (ख) यत्।

**प्रश्ननिर्माणम्–** (*i*) **अकार्यरतः** एव अन्धः भवति। (*ii*) बधिरः **हितानि** न शृणोति।
(*iii*) **मूकः** प्रियाणि वक्तुं न जानाति। (*iv*) **यथासमयं** प्रियाणि एव वदेत्।
(*v*) यः हितानि न शृणोति सः **बधिरः** भवति।

**उत्तराणि–**(*i*) कः (*ii*) कानि (*iii*) कः (*iv*) कदा (*v*) कः।

## पाठ्यपुस्तकस्य अभ्यासः
## (अनुप्रयोगः)

1. अत्र 'क' स्तम्भे सप्त प्रश्नाः 'ख' स्तम्भे च षट् उत्तराणि मञ्जूषायां मिश्रीकृत्य लिखितानि। यस्य प्रश्नस्य उत्तरम् अत्र न लिखितम् तम् प्रश्नम् रेखाङ्कितं कुरुत–

| प्रश्नाः | उत्तराणि |
|---|---|
| (क) किमुपादेयम्? | विवेकी |
| (ख) किं जीवितम्? | मूर्खत्वम् |
| (ग) को जागर्ति? | सत्यप्रियभाषिणो विनीतस्य |
| (घ) का सुखदा? | गुरुवचनम् |
| (ङ) किं मरणम्? | अनवद्यम् |
| (च) क्व स्थातव्यम्? | साधुजनमैत्री |
| (छ) कस्य वशे प्राणिगणः? | |

उत्तराणि–क्व स्थातव्यम् (न्याय्ये पथि दृष्टादृष्टलाभाढ्ये)।

2. पाठम् आश्रित्य उदाहरणानुसारं समुचितपदेन रिक्तस्थानानि पूर्यन्ताम्–

| | |
|---|---|
| यथा–गुरोः वचनम् एव | उपादेयम् |
| (क) कुकर्म एव | ..............................। |
| (ख) गुरूणाम् तिरस्करणम् एव | ..............................। |
| (ग) पठितम् परं न अभ्यस्तम् एव | ..............................। |
| (घ) मानः एव | ..............................। |
| (ङ) मूर्खत्वम् एव | ..............................। |
| (च) शशिनः किरणसमाः एव | ..............................। |
| (छ) अवसरे दत्तम् एव | ..............................। |
| (ज) प्रच्छन्नं यत् पापं कृतं तदेव | ..............................। |

उत्तराणि– (क) हेयम् (ख) विषम् (ग) जाड्यम् (घ) अनर्थफलः (ङ) मरणम्
(च) सज्जनाः (छ) अनर्घम् (ज) शल्यम्।

3. निम्नलिखितानाम् उत्तराणाम् समक्षम् पाठात् विचित्य प्रश्नाः लेखनीयाः–

यथा–

सज्जनाः एव शशिकिरणसमाः भवन्ति। के शशिकिरणसमाः भवन्ति?

| उत्तराणि | प्रश्नाः |
|---|---|
| (क) ज्ञानं लब्धवा छात्रकल्याणाय सर्वदैव तत्परः गुरुः कथ्यते। | .............................. |
| (ख) यः मनसा पूतं समाचरति सः शुचिः। | .............................. |
| (ग) सतः असतश्च ज्ञाता नरः पण्डितः। | .............................. |
| (घ) गुरूणाम् तिरस्करणम् संसारे विषम्। | .............................. |
| (ङ) अस्मिन् लोके यः सत्यवादी, प्रियवादी च तस्य वशे सर्वे जनाः। | .............................. |
| (च) प्राणिनां मूढता निद्रा कथिता। | .............................. |
| (छ) लाभप्राचुर्यम् अगणयित्वा न्यायपूर्णमार्गे एव स्थातव्यम्। | .............................. |
| (ज) त्यागी एव सर्वासाम् विपदाम् विनाशं कर्तुम् समर्थः। | .............................. |

उत्तराणि– (क) कः गुरुः कथ्यते? (ख) कः शुचिः? (ग) कः पण्डितः?
(घ) किम् विषम्? (ङ) कस्य वशे प्राणिगणः? (च) का निद्रा?
(छ) क्व स्थातव्यम्? (ज) सर्वव्यसनविनाशे को दक्षः?

4. अत्र ग्राह्याः गुणाः, त्याज्याः दोषाः च कोष्ठेषु लिखिताः। दोषयुक्तानि कोष्ठानि (✗) इति चिह्नेन चिह्नितानि कुरुत–

| | | | |
|---|---|---|---|
| गुरुवचनम् | गुरुनिन्दा | तत्त्वज्ञता | मूढता |
| धर्मः | विवेकः | चञ्चलता | शिष्यहितम् |
| सज्जनता | शुद्धं मनः | कीर्तिः | संग्रहः |
| त्यागः | अनभ्यासः | अपयशः | मूर्खत्वम् |
| अभ्यासः | साधुजनमैत्री | गुप्तपापम् | अभिमानः |

**उत्तराणि**–गुरुनिन्दा, चञ्चलता, संग्रहः, अनभ्यासः, अपयशः, मूर्खत्वम्, गुप्तपापम्, अभिमानः।

5. अधोलिखितानाम् आकृतीनाम् अधः पाठात् चित्वा समुचितं प्रश्नोत्तरं लिखत–

यथा–

(क)



प्र०–कमलपत्रे स्थितं जलवत् किं तरलम्?

उ०–यौवनम्, धनम्, आयुः

(ख)



प्र०–.........................................।

उ०–.........................................।

(ग)



प्र०–.........................................।

उ०–.........................................।

(घ)



प्र०–.........................................।

उ०–.........................................।

**उत्तराणि**– (ख) प्र०–कः मूकः?
उ०–यः काले प्रियाणि वक्तुम् न जानाति।

(ग) प्र०–अन्धः कः?
उ०–यः अकार्यरतः।

(घ) प्र०–बधिरः कः?
उ०–यः हितानि न श‍ृणोति।

6. शुद्ध-विलोमपदानि मेलयत–

| (अ) | (ब) | उत्तराणि |
|---|---|---|
| (*i*) अकार्यम् | (क) ग्राही | (*i*) कार्यम् |
| (*ii*) सततम् | (ख) विरोधः | (*ii*) ................ |
| (*iii*) विवेकी | (ग) अवद्यम् | (*iii*) ................ |
| (*iv*) जीवनम् | (घ) अविवेकी | (*iv*) ................ |
| (*v*) अनवद्यम् | (ङ) मरणम् | (*v*) ................ |
| (*vi*) यौवनम् | (च) कदाचित् | (*vi*) ................ |
| (*vii*) मैत्री | (छ) कार्यम् | (*vii*) ................ |
| (*viii*) त्यागी | (ज) वार्द्धक्यम् | (*viii*) ................ |

**उत्तराणि**– (*i*) कार्यम् (*ii*) कदाचित् (*iii*) अविवेकी (*iv*) मरणम् (*v*) अवद्यम् (*vi*) वार्द्धक्यम् (*vii*) विरोध: (*viii*) ग्राही।

**7. अधोलिखितसूक्तीनां समक्षं पाठात् चित्वा समुचितपङ्क्तिं लिखत–**

**यथा–**

| | |
|---|---|
| (क) सज्जनानां स्वभावोऽयं येनेन्दु: शिशिरीकृत:। | सज्जना: शशिकिरणसमा: |
| (ख) चलं चित्तं चलं वित्तं चले जीवितयौवने। | ........................ |
| (ग) न्याय्यात् पथ: प्रविचलन्ति पदं न धीरा:। | ........................ |
| (घ) त्रैलोक्ये दीपको धर्म:। | ........................ |
| (ङ) अनभ्यासे विषं विद्या। | ........................ |
| (च) क: पर: प्रियवादिनाम्। | ........................ |
| (छ) न विवेकं विना ज्ञानम्। | ........................ |
| (ज) मन: पूतं समाचरेत्। | ........................ |

**उत्तराणि**– (क) सज्जना: शशिकिरणसमा:। (ख) नलिनीदलगतजलवत्तरलम् किम्? यौवनं धनं चायु:।
(ग) न्याय्येपथि दृष्टादृष्टलाभाढ्ये। (घ) धर्म: पथ्यतर:।
(ङ) पाठतोप्यनभ्यास: जाड्यम्। (च) सत्यप्रियभाषिणो विनीतस्य वशे प्राणिगण:।
(छ) विवेकी एव जागर्ति। (ज) यस्य मानसं शुद्धं स: शुचि:।

**8. 'त्व' प्रत्ययप्रयोग: नपुंसकलिङ्गे भवति तल्, (ता) योगेन च स्त्रीलिङ्गपदानि निर्मीयन्ते।**

भाववाचक-संज्ञाशब्दनिर्माणार्थं 'त्व' एवं तल् (ता) प्रत्ययौ योक्तव्यौ।

त्व

(क) **यथा–** मूर्ख + त्व = मूर्खत्वम्

एवमेव
(*i*) महत् + त्व = ........................
(*ii*) लघु + त्व = ........................
(*iii*) पटु + त्व = ........................
(*iv*) गुरु + त्व = ........................
(*v*) कटु + त्व = ........................

तल् ता

(ख) **यथा–** लघु + ता = लघुता

एवमेव
(*i*) मूढ + ता = ........................
(*ii*) पशु + ता = ........................
(*iii*) महत् + ता = ........................
(*iv*) गुरु + ता = ........................
(*v*) कटु + ता = ........................

**उत्तराणि**– (क) (*i*) महत्त्वम् (*ii*) लघुत्वम् (*iii*) पटुत्वम् (*iv*) गुरुत्वम् (*v*) कटुत्वम्।
(ख) (*i*) मूढता (*ii*) पशुता (*iii*) महत्ता (*iv*) गुरुता (*v*) कटुता।

**9. अध: 'क' भागे केचनविग्रहा: दत्ता:। 'ख' भागे च समस्तपदानि। तयो: समुचितमेलनं क्रियताम्–**

| | 'क' भाग: विग्रह: | 'ख' भाग: समस्तपदम् | 'ग' भाग: उचितं समस्तपदम् |
|---|---|---|---|
| **यथा–** | 1. न कार्यम् | (क) अनर्घम् | (*i*) अकार्यम् |
| | 2. न अवद्यम् | (ख) अनर्थफलम् | (*ii*) ........................ |
| | 3. न अभ्यास: | (ग) अनवद्यम् | (*iii*) ........................ |
| | 4. न अर्थफलम् | (घ) अकार्यम् | (*iv*) ........................ |
| | 5. न अर्घम् | (ङ) अनभ्यास: | (*v*) |

**उत्तराणि**– (*i*) अकार्यम् (*ii*) अनवद्यम् (*iii*) अनभ्यास: (*iv*) अनर्थफलम् (*v*) अनर्घम्।

## योग्यता-विस्तार:
## (न परीक्षाकृते)

### कवि-परिचय:

श्रीमदादिशंकराचार्य: प्रश्नोत्तररत्नमालिकाया: रचयिता। 686 तमे ईसवीये वर्षे वैशाखमासे अस्य जन्म अभूत्। भारतस्य चतसृषु दिक्षु मठचतुष्टयं स्थापयित्वा आचार्य: आध्यात्मिकपुनरुत्थानाय, सांस्कृतिकसामञ्जस्याय, ऐक्यसंस्थापनाय च महत्त्वपूर्णं कार्यं कृतवान्। तेन सम्पूर्णदेशे वेदान्तस्य प्रचाराय भ्रमणम् कृतम्। वयस: द्वात्रिंशत्तमे वर्षे एव स समाधिना प्राणान् अत्यजत्।

**हिंदी अनुवाद (Hindi Translation)**–श्रीमद् आदिशंकराचार्य इसके रचयिता हैं। सन् 686 के वैशाख मास में इनका जन्म हुआ। भारत की चारों दिशाओं में चार मठ स्थापित करके शंकराचार्य ने आध्यात्मिक पुनरुत्थान, सांस्कृतिक

समन्वय तथा एकता की स्थापना के लिए महत्त्वपूर्ण कार्य किया। उन्होंने पूरे देश में वेदान्त के प्रचार के लिए भ्रमण किया। 32 वर्ष की आयु में ही उन्होंने समाधि अवस्था में प्राण त्याग दिए।

**भावविस्तार:**

विविधैः मूल्यैः युक्ताः अन्याः सूक्तयः पठ्यन्ताम्

**गुरुः** 1. आचार्यः प्लावयिता, सम्यग्ज्ञानं प्लव इहोच्यते। 2. दुर्लभः सः गुरुः लोके शिष्यचिन्तापहारकः। 3. यः तारयेदविद्यां स: गुरुः। 4. आज्ञा गुरूणाम् हि अविचारणीया।

**हिंदी अनुवाद (Hindi Translation)–**

**गुरु** 1. आचार्य ही सम्यक् ज्ञान करवाने वाला है।
2. शिष्य की चिन्ताओं को हरने वाला गुरु संसार में प्राप्त होना कठिन है।
3. जो अज्ञान से पार लगा दे (दूर कर दे) वही गुरु है।
4. गुरुजनों की आज्ञा का पालन तर्क किए बिना तुरन्त करना चाहिए।

**धर्मः** 1. आचारः परमो धर्मः। 2. एको धर्मः परं श्रेयः। 3. धर्मो रक्षति रक्षितः। 4. स्वधर्मे निधनं श्रेयः परधर्मः भयावहः।

**हिंदी अनुवाद (Hindi Translation)–**

**धर्म** 1. सदाचरण सबसे बड़ा धर्म है।
2. एक धर्म पर अडिग रहना ही कल्याणकारी है।
3. धर्म की रक्षा करने पर धर्म व्यक्ति की रक्षा करता है।
4. अपने धर्म का पालन करते हुए मृत्यु को स्वीकार करना भी श्रेष्ठ है, दूसरा धर्म नहीं।

**साधुसङ्गः** 1. साधुसङ्गः प्राणात् अपि प्रियः।
2. सत्सङ्गतिः कस्य न उन्नतिकारकः?
3. सत्सङ्गतिः कथय किं न करोति पुंसाम्?

**हिंदी अनुवाद (Hindi Translation)–**

**सज्जनों का साथ** 1. सज्जनों का साथ प्राणों से भी प्रिय होता है।
2. सज्जनों की संगति किसके लिए उन्नतिकारक नहीं होती?
3. कहो सज्जनों की संगति मनुष्यों का क्या उपकार नहीं करती?

**विनम्रः** 1. विनम्रः सदा वर्धते।
2. स्वभावतः सर्वदा विनीतः विद्वद्भिः पूज्यः।
3. नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।

**हिंदी अनुवाद (Hindi Translation)–**

**विनम्र** 1. विनम्र व्यक्ति सदा उन्नति करता है।
2. स्वभाव से सदा विनम्र व्यक्ति विद्वानों द्वारा पूजनीय होता है।
3. फलों से भरे हुए वृक्ष झुक जाते हैं तथा गुणवान व्यक्ति नम्र होते हैं।

| चत्वारः सन्ति | 1 | 2 | 3 | 4 |
|---|---|---|---|---|
| 1. वेदाः | ऋग्वेदः | सामवेदः | यजुर्वेदः | अथर्ववेदः |
| 2. आश्रमाः | ब्रह्मचर्यम् | गृहस्थाश्रमः | वानप्रस्थः | संन्यासः |
| 3. पुरुषार्थाः | धर्मः | अर्थः | कामः | मोक्षः |
| 4. मठाः | जगन्नाथपुर्याम् गोवर्धनमठः | द्वारिकायाम् शारदामठः | रामेश्वरे शृङ्गेरीमठः | बदरीनाथपर्वते ज्योतिर्मठः |
| 5. महावाक्यानि | प्रज्ञानं ब्रह्म | तत्त्वमसि | अहं ब्रह्मास्मि | अयमात्मा ब्रह्म |

**हिंदी अनुवाद (Hindi Translation)–**

| | | | | |
|---|---|---|---|---|
| 1. वेद | 1. ऋग्वेद | 2. सामवेद | 3. यजुर्वेद | 4. अथर्ववेद |
| 2. आश्रम | 1. ब्रह्मचर्य | 2. गृहस्थ | 3. वानप्रस्थ | 4. संन्यास |
| 3. पुरुषार्थ | 1. धर्म | 2. अर्थ | 3. काम | 4. मोक्ष |
| 4. मठ | 1. जगन्नाथपुरी | 2. द्वारिका | 3. रामेश्वरम् | 4. बदरीनाथ |
| | 5. गोवर्धन | 6. शारदामठ | 7. शृङ्गेरीमठ | 8. ज्योतिर्मठ |

5. महावाक्य
1. प्रज्ञानं ब्रह्म (आत्मा का विशेष ज्ञान ही ब्रह्म का ज्ञान है)
2. तत्त्वमसि (वही आत्मा तुम हो)
3. अहं ब्रह्मास्मि (मैं ब्रह्म हूँ)
4. अयमात्मा ब्रह्म (यह आत्मा ब्रह्म है)

## परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

**1. निम्नलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत–** **5**

**कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।**
**सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी॥**

**(I) एकपदेन उत्तरत–** $\frac{1}{2} \times 2 = 1$

(*i*) का सुखदा भवति? (*ii*) कः अनर्थफलः भवति?

**(II) पूर्णवाक्येन उत्तरत–** $2 \times 1 = 2$

कीदृशः जनः सर्वविपत्तीनां नाशे समर्थः भवति?

**(III) भाषिककार्यम्–** ½ × 4 = 2

**(i) 'दु:खदा' पदस्य विपरीतार्थकं पदं लिखत।**

(क) सुखदा (ख) सुखद: (ग) सुखदं (घ) सुखदा:

**(ii) अस्मिन् श्लोके 'अनर्थम्' इति पदस्य शुद्धः अर्थ: चीयताम्।**

(क) निरर्थकम् (ख) अनिष्टम् (ग) धनहितम् (घ) विनाशम्

**(iii) 'मित्रता' पदस्य पर्याय: क:?**

(क) साधुजनमैत्री (ख) साधुजन: (ग) मैत्री (घ) मान:

**(iv) श्लोके अव्यय पदं किं वर्तते?**

(क) सर्वथा (ख) दक्ष: (ग) त्यागी (घ) मान:

**उत्तराणि–** I. (i) साधुजनमैत्री (ii) मान:।

II. सर्वथा त्यागी जन: सर्वविपत्तीनां नाशे समर्थ: भवति।

III. (i) (क) सुखदा (ii) (ख) अनिष्टम् (iii) (ग) मैत्री (iv) (क) सर्वथा।

**2. अधोलिखितकथनेषु रेखाङ्कितानि पदानि आधृत्य उदाहरणानुसारम् प्रश्ननिर्माणम् कुरुत–** 1 × 5 = 5

(i) कमलपत्रे स्थितं जलवत् तरलं हि <u>यौवनम्</u>।

(क) क: (ख) कम् (ग) किम् (घ) काम्

(ii) <u>सज्जना:</u> शशिकिरणसमा: भवन्ति।

(क) के (ख) क: (ग) का: (घ) का

(iii) त्यागी <u>सर्वव्यसनविनाशे</u> दक्ष:।

(क) के (ख) कुत्र (ग) कदा (घ) कस्मिन्

(iv) <u>प्राणिनां</u> मूढता निद्रा कथिता।

(क) कासाम् (ख) केषाम् (ग) काम् (घ) कान्

(v) प्राणिनां मूढता <u>निद्रा</u> कथिता।

(क) का (ख) का: (ग) के (घ) काम्

**उत्तराणि–** (i) (ग) किम्? (ii) (क) के? (iii) (घ) कस्मिन्? (iv) (ख) केषाम्? (v) (क) का?

**3. अधोलिखितपंक्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारम् शुद्धम् अर्थम् चिनुत–** 4

I. **हेयम्** च किम्? अकार्यम्।

(i) अश्व: (ii) पूर्वदिनं (iii) त्याज्यम्

II. किं च **अनर्घम्**? यदवसरे दत्तम्।

(i) न अर्धम् इति (सम्पूर्णम्) (ii) पूजायै अर्घ्यम् (iii) अमूल्यम्

III. न्याय्येपथि दृष्टादृष्ट **लाभाढ्ये** स्थातव्यम्।

(i) गाम्भीर्ये (ii) लाभे (iii) लाभदायके

IV. कोऽनर्थफल:? **मान:**।

(i) मापनम् (ii) सम्मानम् (iii) अभिमानम्

**उत्तराणि–** I. (i) त्याज्यम् II. (ii) अमूल्यम् III. (iii) लाभदायके IV. (iii) अभिमानम्।

**4. शुद्धम् अर्थमेलनं चिनुत–** 1 × 4 = 4

| | |
|---|---|
| (i) हेयम् | (क) बहुमूल्यम् |
| (ii) अनवद्यम् | (ख) त्याज्यम् |
| (iii) दक्ष: | (ग) अनिन्दनीयम् |
| (iv) अनर्घम् | (घ) कुशल: |

**उत्तराणि–** (i) त्याज्यम् (ii) अनिन्दनीयम् (iii) कुशल: (iv) बहुमूल्यम्।

**5. निम्नलिखितश्लोकयो: भावम् उपयुक्तशब्दै: पूरयित्वा भावार्थं पुन: लिखत। शब्दानां चयनं मञ्जूषाया: कर्त्तव्यम्–** ½ × 8 = 4

**I. किं जीवितम्? अनवद्यम्, किं जाड्यम्? पाठतोऽप्यनभ्यास:।**
**को जागर्ति? विवेकी, का निद्रा? मूढता जन्तो:॥**

**भाव:**–अनिन्द्यं निष्कलङ्कम् च जीवनम् एव वस्तुत: जीवनं कथयितुम् शक्यते। पठितं परं तस्य अभ्यास: न कृत: तदेव (i) .................... कथ्यते यतो हि अनभ्यासे विद्या विषम् भवति। स एव नर: (ii) .................... य: जीवने सदैव जागरूक: भवति। य: अवसरे प्राप्ते सावधान: भूत्वा तस्य (iii) .................... न करोति, तस्य नरस्य ईदृशी मूर्खता एव अत्र (iv) .................... कथिता।

**II. "कोऽन्धः? योऽकार्यरतः, को बधिरः? यो हितानि न शृणोति।"**

**भावः**–'अस्मिन् संसारे स एव (*i*) ........................ यः उचितानुचितं जानन् अपि (*ii*) ........................ कृत्यं करोति सः च (*iii*) ........................ कथ्यते यः हितकारि वचनं न (*iv*) ........................।

**मञ्जूषा**– सदुपयोगं, अकरणीयं, बधिरः, अन्धः, मूढता, जाड्यम्, विवेकी, शृणोति।

**उत्तराणि**– I. (*i*) जाड्यम् (*ii*) विवेकी (*iii*) सदुपयोगं (*iv*) मूढता।
II. (*i*) अन्धः (*ii*) अकरणीयं (*iii*) बधिरः (*iv*) शृणोति।

**6. निम्नलिखितश्लोकयाः भावम् उपयुक्तशब्दैः पूरयित्वा भावार्थं पुनः लिखत। उपयुक्तानां शब्दानां चयनं मञ्जूषातः कर्त्तव्यम्।** **½ × 4 = 2**

**कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।**
**सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी॥**

अस्य भावः अयम् यत् (*i*) ........................ परिणामे अनर्थकरः भवति। अतः मानः अत्र (*ii*) ........................ कथितः। साधुजनानां (*iii*) ........................ सदैव सुखदायिनी भवति। य मानवः सर्वथा (*iv*) ........................ भवति स एव सर्वासां विपदां विनाशं कर्त्तुं समर्थः भवति।

**मञ्जूषा**– मैत्री / मित्रता, त्यागी, अभिमानः, अनर्थफलः।

**उत्तराणि**–(*i*) अभिमानः (*ii*) अनर्थफलः (*iii*) मैत्री/मित्रता (*iv*) त्यागी।

**7. अन्वयद्वयं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत (सहायतायै मञ्जूषा अपि दत्ता)–** **½ × 8 = 4**

**1. किं मरणम्? मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।**
**आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्॥**

## अन्वयं लिखत (Prose-order)

**किं मरणम्? मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।**
**आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्॥**

मरणं किम्? (*i*) ........................ अनर्घं च किम्? यत् (*ii*) ........................ दत्तम्। आमरणात् (*iii*) ........................ किम्? यत् पापम् (*iv*) ........................ कृतम्।

**मञ्जूषा**– शल्यं, प्रच्छन्नम्, मूर्खत्वम्, अवसरे

**उत्तराणि**–(*i*) मूर्खत्वम् (*ii*) अवसरे (*iii*) शल्यं (*iv*) प्रच्छन्नम्

**2. कोऽन्धः? योऽकार्यरतः, को बधिरः? यो हितानि न शृणोति।**
**को मूकः? यः काले प्रियाणि वक्तुं न जानाति॥**

## अन्वयं लिखत (Prose-order)

**कोऽन्धः? योऽकार्यरतः, को बधिरः? योहितानि न शृणोति।**
**को मूकः? यः काले प्रियाणि वक्तुं न जानाति॥**

अन्धः कः? यः (*i*) ........................, बधिरः कः? यः (*ii*) ........................ न शृणोति। मूकः कः? (*iii*) ........................ काले (*iv*) ........................ वक्तुं न जानाति।

**मञ्जूषा**– हितानि, प्रियाणि, अकार्यरतः, यः।

**उत्तराणि**–(*i*) अकार्यरतः (*ii*) हितानि (*iii*) यः (*iv*) प्रियाणि।

**8. अधोलिखितानां पदानां विपर्ययचयनं कृत्वा लिखत–**

| पदानि | विपर्ययाः |
|---|---|
| (1) हेयम् | (क) सम्मानम् |
| (2) गुरुः | (ख) कलङ्कयुक्तम् |
| (3) सततम् | (ग) ग्राह्यम् |
| (4) अवधीरणा | (घ) विरोधः |
| (5) अनवद्यम् | (ङ) शिष्यः |
| (6) मूढता | (च) पुष्पम् |
| (7) सज्जनाः | (छ) वक्ता |
| (8) मैत्री | (ज) विद्वता |
| (9) शल्यम् | (झ) कदाचित् |
| (10) श्रोता | (ञ) दुर्जनाः |

**उत्तराणि**– (1) ग्राह्यम् (2) शिष्यः (3) कदाचित् (4) सम्मानम् (5) कलङ्कयुक्तम्
(6) विद्वता (7) दुर्जनाः (8) विरोधः (9) पुष्पम् (10) वक्ता।

## मूल्यपरक प्रश्नाः (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्नाः** (*i*) 'को गुरुः? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्।' इति श्लोकांशे कः अधिगततत्त्वः कथितः?
(*ii*) 'किं विषम्? अवधीरणा गुरुषु।' गुरुणाम् अपमानं छात्रेभ्यः किं भवति?
(*iii*) 'का निद्रा? मूढता जन्तोः।' इति वाक्ये निद्रा केषां मूर्खता अस्ति?
(*iv*) 'प्रच्छन्नं कृतं पापं जीवेभ्यः आमरणात् शल्यम्।' अत्र जीवानाम् आजीवनं शल्यं किं कथितम्?
(*v*) 'कोऽन्धः? योऽकार्यरतः।' दुष्कार्येषु रतः जनः संसारे कीदृशो वर्तते?

**उत्तराणि**– (*i*) गुरुः (*ii*) विषम् (*iii*) जन्तूनाम् (*iv*) प्रच्छन्न-कृतप्रापम् (*v*) अन्धः